# पंचसूक्तानि

ॐ

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः।

श्री पद्मावती समेत वेङ्कटेशाय नमः।

श्री विष्णवे परमात्मने नमः।

श्रीमते रामानुजाय नमः।

श्री निगमान्त महा देशिकाय नमः।

श्री सायिराम्।

## पुरुषसूक्तम्

हरिः ओम्

॥ पूर्वानुवाकः ॥

सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्।
स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशांगुळम्॥ १॥

पुरुष एवेदꣳसर्वम्। यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति॥ २॥

एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः।
पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि॥ ३॥

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः।
ततो विष्वङ्व्यक्रामत्। साशनानशने अभि॥ ४॥

तस्माद् विराडजायत। विराजो अधि पूरुषः।
स जातो अत्यरिच्यत। पश्चाद् भूमिमथो पुरः॥ ५॥

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः॥ ६॥

सप्तास्यासन्परिधयः। त्रिस्सप्तसमिधः कृताः।
देवा यद्यज्ञं तन्वानाः। अबध्नन् पुरुषं पशुम्॥ ७॥

तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः।
तेन देवा अयजन्त। साध्या ऋषयश्च ये॥ ८॥

तस्माद्यज्ञात्सर्वहुतः। सम्भृतं पृषदाज्यम्।
पशूꣳस्ताꣳश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये॥ ९॥

तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥ १०॥

तस्मादश्वा अजायन्त। ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः॥ ११॥

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते॥ १२॥

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः। पद्भ्याꣳशूद्रो अजायत॥ १३॥

चन्द्रमा मनसो जातः। चक्षोस्सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत॥ १४॥

नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौस्समवर्तत।
पद्भ्यां भूमिर्दिशश्श्रोत्रात्। तथा लोकाꣳअकल्पयन्॥ १५॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे।
सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते॥ १६॥

धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते॥ १७॥

यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः॥ १८॥

॥ उत्तरानुवाकः ॥

अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि।
तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे॥ १॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति। नाऽन्यः पन्था विद्यतेऽयनाय॥ २॥

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।
तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥ ३॥

यो देवेभ्य आतपति। यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये॥ ४॥

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे॥ ५॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे।
नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्।
इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥ ६॥

हरिः ओम्

* * * * *

# विष्णुसूक्तम्

॥ नारायणानुवाकः ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायण॒ँ॒देवमक्षरं परमं प्रभुम्॥ १॥

विश्वतः परमं नित्यं विश्वं नारायण॒ँ॒हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥ २॥

पतिं विश्वस्यात्मेश्वर॒ँ॒शाश्वत॒ँ॒शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥ ३॥

नारायणपरं ब्रह्म तत्वं नारायणः परः।
नारायण परो ज्योतिरात्मा नारायणः परः॥ ४॥

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः॥ ५॥

अनन्तमव्ययं कवि॒ँ॒समुद्रेऽन्तं विश्वशम्भुवम्।
पद्म कोशप्रतीकाश॒ँ॒हृदयं चाप्यधोमुखम्॥ ६॥

अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥ ७॥

सन्तत॒ँ॒सिराभिस्तु लम्बत्या कोशसन्निभम्।
तस्यान्ते सुषिर॒ँ॒सूक्ष्मँ तस्मिन्त्सर्वं प्रतिष्ठितम्॥ ८॥

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः॥ ९॥

सन्तापयति स्वं देहमापादतलमस्तकम् ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥ १० ॥

नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीताभा स्यात्तनूपमा ॥ ११ ॥

तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट् ॥ १२ ॥

ऋतꣳसत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळम् ।
ऊर्ध्व रेतं विरूपाक्षं विश्वरूपाय वै नमः ॥ १३ ॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥ १४ ॥

ओं नारायणाय विद्महे ----- ----- ----- -----

॥ विष्णुसूक्तम् ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो
अस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोरराटमसि विष्णोः
पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि
विष्णवे त्वा ॥

तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उथ्सः ॥

प्रतद्विष्णुस्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्याः विष्णो देवत्वं परमस्य विथ्से ॥

विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्।
ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिꣳसुजनिमाचकार॥

त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा।
प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषꣳह्यस्य स्थविरस्य नाम॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्या स्सप्तधामभिः॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पाꣳसुरे॥

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
ततो धर्माणि धारयन्॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यस्सखा॥

तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्॥

तद्विप्रासो विपन्यवो जागृवाꣳसस्समिन्धते।
विष्णोर्यत्परमं पदम्॥

पर्याप्त्या अनन्तरायाय सर्वस्तोमोति रात्र उत्तम महद्भवति।
सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

हरिः ओम्

* * * * *

# श्रीसूक्तम् - भूसूक्तम् - नीळासूक्तम्

## श्रीसूक्तम्

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥

तां म आवह जातवेदो लक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम्॥ ३ ॥

कां सोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम्॥ ४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीꣳशरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥ ६ ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वान् निर्णुद मे गृहात्॥ ८ ॥

गन्धद्वारां दुराधर्षांनित्यपुष्टां करीषिणीम्।
ईश्वरीꣳसर्वभूतानां तामिहोपह्वये श्रियम्॥ ९ ॥

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनाꣳरूपमन्नस्य मयि श्रीश्श्रयतां यशः ॥ १० ॥

कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरꣳश्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यःकरिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ १६ ॥

श्रियै जातः श्रिय आनिर्याय श्रियं वयो जनितृभो दधातु ।
श्रियं वसाना अमृतत्वमायन् भजन्ति सद्यस्सविधा वितद्यून् ॥ १७ ॥

श्रिय एवैनं तत्छ्रियामादधाति ।
सन्ततमृचा वषट्कृत्यं संधत्तं सन्धीयते प्रजया पशुभिः ।

य एवं वेद ॥

ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

ओं महादेव्यै च विद्महे ----- ----- ----- -----

हरिः ओम्

# भूसूक्तम्

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।
उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥ १ ॥

आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः ।
पितरं च प्रयन्त्स्सुवः ॥ २ ॥

त्रिꣳशद्धाम विराजति वाक्पतङ्गाय शिश्रिये ।
प्रत्यस्य वहद्युभिः ॥ ३ ॥

अस्य प्राणादपानत्यन्तश्चरति रोचना ।
व्यख्यन्महिषस्सुवः ॥ ४ ॥

यत्वा क्रुद्धः परो वप मन्युना यदवर्त्या ।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ ५ ॥

यत्ते मन्युपरोत्पस्य पृथिवीमनु दध्वसे ।
आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥ ६ ॥

मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणां श्रोत्रंचक्षुर्मनः । देवी हिरण्यगर्भिणी देवी प्रसोदरी । रसने सत्यायने सीद । समुद्रवती सावित्री हनो देवी मह्यङ्गी । महोधरणी महो ध्यतिष्ठाः शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी । इन्द्रपत्नी व्यापिनी सरसिज इह वायुमती जलशयनी स्वयन्धा राजा सत्यन्धो परिमेदिनी सो परिधत्तं गाय । विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।

ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ।

ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ।

महीं देवीं विष्णुपत्नीमजूर्याम् । प्रतीचीमेनाꣳहविषा यजामः । त्रेधा विष्णुरुरुगायो विचक्रमे । महीं दिवं पृथिवीमन्तरिक्षम् । तत्च्छ्रोणैति श्रव इच्छमाना । पुण्यꣳश्लोकं यजमानाय कृण्वती ॥

हरिः ओम्

# नीळासूक्तम्

नीळां देवीं शरणमहं प्रपद्ये सुतरसितरसो नमः।
गृणाहि ॥

धृतवती सवितराधिपत्यैः पयस्वती रन्तिराशानो अस्तु।
ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता ॥

बृहस्पतिर्मातरिश्वोत वायुस्सन्धुवाना वाता अभि नो गृणन्तु।
विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

हरिः ओम्

| HOME | STOTRA LIST | PREVIOUS ARCHIVE | NEXT ARCHIVE |
| --- | --- | --- | --- |

Hosted by tripod